# Naradakritam 2 Vishnu Stotram

# नारदकृतं २ विष्णुस्तोत्रम्

## Document Information

Text title : Naradakritam 2 Vishnu Stotram

File name : nAradakRRitaM2viShNustotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | vaiShNavakhaNDa | badarikAkhaNDa | adhyAya 3/29-34||

Latest update : May 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 5, 2025

*sanskritdocuments.org*

# नारदकृतं २ विष्णुस्तोत्रम्

नारद उवाच ।
यः सर्वसाक्षी जगतामधीश्वरो भक्तेच्छया जातशरीरसम्पदः ।
कृपामहाम्भोनिधिराश्रितानां प्रसीदतां पावनदिव्यमूर्तिः ॥ २९॥

हिताय लोकस्य सतां पुनर्मनः सुतोषणायाचिरमुत्कलादिभिः ।
प्रसन्नलीलाहसितावलोकनः प्रसीदतां सत्त्वनिकायमूर्तिमान् ॥ ३.३.३०॥

कन्दर्पलावण्यविलाससुन्दरः प्रसन्नगम्भीरगिरेन्दिरोत्सवः ।
स्वमाश्रितानां वरकल्पपादपः प्रसीदतां दीनदयार्द्रमानसः ॥ ३१॥

यदङ्घ्रिपद्मार्चननिर्मलान्तरा ज्ञानासिना शातितबन्धहेतवः ।
विदन्ति यद्ब्रह्मसुखं गतक्लमाः प्रसीदतां दीनदयार्द्रमानसः ॥ ३२॥

संसारवारान्निधिबद्धसेतुर्यः सृष्टिपालान्तविधानहेतुः ।
उपान्तनामा गुणलब्धमूर्तिः प्रसीदतां ब्रह्मसुखानुभूतिः ॥ ३३॥

य इन्द्रियाधिष्ठितभूतसूक्ष्माद्विकासहेतुर्द्युतिमद्वरिष्ठः ।
जीवात्मतां गच्छति मायया स्वया स एक ईशो भगवान्प्रसीदताम् ॥ ३४॥

स्वदृग्गुणैर्येन विलिप्यते महान्गुणाश्रयं येन च पाञ्चभौतिकम् ।
एकोऽपि नानागुणसम्प्रयुक्तः प्रसीदतां दीनदयालुवर्यः ॥ ३५॥

यस्यानुवर्तिनो देवा विपदां पदमम्बुधिम् ।
कृत्वा वत्सपदं स्वर्गे निरातङ्का वसन्ति हि ॥ ३६॥

नमस्ते वासुदेवाय नमः सङ्कर्षणाय च ।
प्रद्युम्नायानिरुद्धाय सर्वभूतात्मने नमः ॥ ३७॥

अद्य मे जीवितं धन्यमद्य मे सफलं तपः ।
अद्य मे सफलं ज्ञानं दर्शनात्ते जनार्दन ॥ ३८॥

इति श्रीस्कन्दपुराणे वैष्णवखण्डे बदरिकाश्रममाहात्म्ये तृतीयाध्यायान्तर्गतं

नारदकृतं विष्णुस्तोत्रं समाप्तम् ।

स्कन्दपुराण । वैष्णवखण्ड । बदरिकाखण्ड । अध्याय ३/२९-३४॥

skandapurANa . vaiShNavakhaNDa . badarikAkhaNDa . adhyAya 3/29-34..

Proofread by PSA Easwaran

---

*Naradakritam 2 Vishnu Stotram*

pdf was typeset on May 5, 2025

Please send corrections to *sanskrit@cheerful.com*